University of Mysore

Department of studies in sanskrit



# ECOLOGY IN SANSKRIT LITERATURE

# संस्कृतसाहित्ये पर्यावरणचिन्तनम्



# ECOLOGY IN SANSKRIT LITERATURE

## ॥ संस्कृतसाहित्ये पर्यावरणचिन्तनम् ॥

**EDITORIAL COMMITEE :**


**Prof. K. Narayan Bhatta**
Proffessor and Chairman, DOS in Sanskrit,
University of Mysore

**Dr. Suresh Hegde**
Guest Faculty, DOS in Sanskrit,
University of Mysore

**Dr. R. Suresha**
Guest Faculty, DOS in Sanskrit,
University of Mysore

**Dr. Rachoti Devaru**
Guest Faculty, DOS in Sanskrit,
University of Mysore

**Dr. Pushpalatha S. M.**
Guest Faculty, DOS in Sanskrit,
University of Mysore



Published by :
**Department of Studies in Sanskrit**
Manasagangotri, University of Mysore
Mysuru - 06

**ECOLOGY IN SANSKRIT LITERATURE** - a compendium of the articles at the National seminar held on 26th February - 2020 at **Department of Studies in Sanskrit,** Manasagangotri, University of Mysore, Mysuru - 06

Pages : ix + 351 = 360

Size : Demy 1/8

Edition : 2020

Copies : 100

Price : 300/-

Copy Right : Author

Published by : Department of Studies in Sanskrit,
Manasagangotri, University of Mysore, Mysuru - 06

ISBN No. : 978 - 1 - 56646-725-4

Printing : Swathi Printing & Tradesr, Mysuru
Mobile : 9844266994

# Contents


| SANSKRIT | | |
|---|---|---|
| 1 नैषधमहाकाव्ये पर्यावरणचिन्तनम् | Prof. K. Narayana Bhatta | 1 |
| 2 परिसरसंरक्षणेन सर्वसंरक्षणम् | Vidvan Dr. T. V. Satyanarayantalakadu | 8 |
| 3 धर्मशास्त्रे पर्यावरणविचारः | Dr. Venkaramana Hegde | 12 |
| 4 वेदेषु परिसरचिन्तनम् | Dr. Shrikrishna Bhat | 18 |
| 5 वैदिकवाङ्ङ्के पर्ङ्कावरण चिन्तना | Dr. G. Sireesha | 25 |
| 6 सुस्थिरासामरस्या प्रगतिः प्रकृतिप्रपत्तिमूला | Dr. R. Suresh | 35 |
| 7 रघुवंशमहाकाव्ये कालिदासस्य वृक्षप्रेमात्मकं पर्यावरणचिन्तनम् | Dr. Srinivasa | 44 |
| 8 वृक्ष चिन्तनम् | Vid. Pradeep Joshi | 48 |
| 9 न्यायवैशेषिकदर्शनयोः जलविचारः | Dr. Raghava K. L. | 55 |
| 10 पुराणरीत्या पर्यावरणे कालस्य प्राधान्यम् | Dr. Diddige Vashikrishna | 62 |
| 11 विश्ववल्लभवृक्षायुर्वेदः किञ्चन अवलोकनम् | Dr. Udayan Hegde | 67 |
| 12 वैदिक वाङ्मये पर्यावरणस्य उत्पत्तेः विश्लेषणात्मक समीक्षणम् । | Ishwara P. Bhat | 72 |
| 13 संस्कृतसाहित्ये पर्यावरणविज्ञानं | Hemaraj N. M. | 78 |
| 14 कालिदासीयरूपकेषुपर्यावरणप्रीतिः | Vanaraja B K | 85 |
| 15 मेघदूते मानवपर्यावरणसम्बन्धः | Murthy V H | 94 |
| 16 ऋषिदृष्ट्यापर्यावरणसमीक्षणम् | Dr. Naveen Bhat | 102 |
| 17 आर्षसाहित्ये युद्धं पर्यावरणञ्च | Sri Rachoti Deva | 106 |
| 18 संस्कृतसाहित्ये पर्यावरणचिन्तनम् श्रीवादिराजपूज्यचरणविरचिते तीर्थप्रबन्धे पर्यावरणचिन्तनम् | Dr.Ananda. Acharya, U V | 113 |

ISBN 978-1-56646-725-4

# कालिदासीयरूपकेषुपर्यावरणप्रीतिः

**Vanaraja B K**
Asst. Professor
Karnataka Samskrit University
Chamarajpet, Bangalore-560018
Mob-9731027548
Email Id: vanakadu@gmail.com

## • प्रस्तावना

पुरा बहवः विद्वांसः कवयः विद्वत्कवयश्च अगाधं संस्कृतसाहित्यं पोषयित्वा आधुनिकेभ्यः संस्कृताभिमानिभ्यः संस्कृतज्ञानिभ्यश्च उपायनीकृतवन्तः । संस्कृतकाव्येषु तावत् मनोहराणि नानाविषयस्यन्दीनि बहूपयोगीनि तत्त्वानि च उपनिबद्धानि । संस्कृतकाव्यसाहित्यजगति सर्वदा राजते तत्र भगवान् कालिदासः । काव्यस्य सर्वप्रकारेषु स्वाप्रतिमप्रतिभाकौशलं प्रदर्श्य कालिदासः कविकुलगुरुरिति प्रथाम् अलभत । सः स्वकीयकाव्येषु न केवलं प्रतिपाद्यमानविषयम् अकथयत् किन्तु तदङ्गत्वेन पर्यावरणस्य निसर्गस्य वा रमणीयतामपि वर्णयित्वा मानवप्रकृतिसम्बन्धं सुष्ठु न्यरूपयत् । अधुना मानवप्रकृतिसम्बन्धः शिथिलितः वर्तते । मानवः पर्यावरणम् अवगणयन् अस्ति । अतः क्षमामयी धरित्री अपि स्वक्षमागुणं विहाय नानाविधप्रकोपान् प्रदर्शयन्ती मानवान् जागरयन्ती वर्तते । अतः अधुना कालिदासस्य पर्यावरणीयचिन्तनानि नूनं विमर्शणीयानि । विशेषेण भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनमिति ख्यातस्य रूपकस्य हि परामर्शः क्रियेत । अतः अस्मिन् शोधलेखे कालिदासेन स्वीयरूपकेषु सन्दर्शिता पर्यावरणप्रीतिः समासेन परामृष्टा ।

## • संस्कृतभाषा

भारतस्य द्वे प्रतिष्ठे संस्कृतं संस्कृतिस्तथा' इति सुप्रतिष्ठिता इयं संस्कृतभाषा सरला मनोज्ञा सर्वचित्तापहारिणी च विराजतेतराम् । 'संस्कृतम्' इत्यन्वथमभिधानं दधानः अमरव्याहारोऽसौ मुनिप्रणीतव्याकरणादिशास्त्रैः परिपूर्णः

ISBN 978-1-56646-725-4

परिपूतश्च शोभते । अतः जागतिके स्तरे नितान्तं समृद्धा असौ संस्कृतभाषा सर्वदापि अन्यूनान्तस्सत्वा विद्योतते ।

- **संस्कृतसाहित्यम्**

साहित्यं नाम सहितयोर्भावः इति शब्दमर्यादया सिद्ध्यति । सहितयोः नाम शब्दार्थयोः इति अर्थमर्यादया ज्ञायते । संस्कृतसाहित्ये वैदिकसाहित्यं लौकिकसाहित्यं चेति द्वेधा विभागः भवति । तत्र अपौरुषेये वैदिकसाहित्ये ऋग्यजुस्सामाथर्वाख्याः चत्वारः वेदाः, शिक्षाव्याकरणादीनि षडङ्गानि, धनुर्वेदादयः उपवेदाः च अन्तर्भवन्ति ।

वेदाः शास्त्राणि च विधिनिषेधविधानेन प्रभुरिव **'एतत् कर्तव्यम् एतन्न कर्तव्यम्'** इति शासन्ति इति हेतोः एतेषां प्रभुसंमितम् इति अभिधानम् । अनेन वैदिकसाहित्येन धर्मार्थकाममोक्षाख्याः चत्वारः पुरुषार्थाः, तत्त्वज्ञानं, मनसः शान्तिरपि च उपलभ्यन्ते ।

लौकिकसाहित्ये ऐतिहासिकसाहित्यं, पौराणिकसाहित्यं, काव्यसाहित्यं चेति प्राधान्येन विभागत्रयं दृश्यते । रामायणमहाभारतादीनि ऐतिहासिकसाहित्यानि । भागवतब्रह्माण्डादीनि अष्टादशपुराणानि उपपुराणान्यपि पौराणिकसाहित्ये अन्तर्भवन्ति । पुराणानि सदसद्विचारान् निरूप्य मित्रवत् जनान् सन्मार्गं सूचयन्ति इति हेतोः मित्रसंमितम् इति तेषाम् अभिधानम् । काव्यसाहित्यं तु विशालं सत् विपुलानां नाना प्रकाराणां काव्यानाम् आश्रयस्थानं भूत्वा सहृदयानां जनानां मनांसि आकर्षयति ।

- **काव्यसाहित्यम्**

**'द्वे वर्त्मनी गिरां देव्याः शास्त्रं च कविकर्म च'**इत्युक्तिवत् **'कवेः कर्म काव्यम्'** इति निष्पन्नं काव्यपदं काव्यानां महासमुद्रमेव प्रतिनिधत्ते ।**"काव्यं यशसे अर्थकृते व्यवहारविदे शिवेतरक्षतये सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे"1**चेत्यादिभिः वाक्यैः काव्यप्रयोजनानि निरुक्तानि ।अनेकप्रयोजनपरम्पराभूयिष्ठं काव्यसाहित्यं साहित्यरसिकानां सहृदयानां हृदयानि रञ्जयति । काव्यानि कान्ता इव आत्यन्तिकप्रीत्या अनुनयेन च जनान् सन्मार्गे

ISBN 978-1-56646-725-4

प्रवर्तयन्ति इष्टार्थं च प्रापयन्ति इति हेतोः एतेषां कान्तासंमितम् इति अभिधानं प्रदत्तं वर्तते ।

काव्येषु प्रधानतया भेदद्वयं वर्तते दृश्यकाव्यं श्रव्यकाव्यं चेति । तत्र द्रष्टुं योग्यं काव्यं दृश्यं काव्यम् इत्युच्यते । दृश्यकाव्ये दशरूपकाणि अष्टादशोपरूपकाणि च अन्तर्भवन्ति । नाटकं, प्रकरणं, भाणः, व्यायोगः, समवकारः, डिमः, ईहामृगः, अङ्कः, वीथी, प्रहसनमिति रूपकाणि दशधा भिद्यन्ते । उपरूपकाणि तु नाटिका, त्रोटकं, गोष्ठी, सट्टकं, नाट्यरासकं, प्रस्थानम्, उल्लाप्यं, काव्यं, प्रेङ्खणं, रासकं, संलापकं, श्रीगदितं, शिल्पकं, विलासिका, दुर्मल्लिका, प्रकरणी, हल्लीशः, भाणिका इति अष्टादशधा विभक्तानि।

श्रोतुं योग्यं काव्यं श्रव्यं काव्यं भवति । श्रव्यकाव्यमपि पुनः त्रिविधं भवति गद्यकाव्यं, पद्यकाव्यं चम्पूकाव्यं चेति । **'वृत्तगन्धोज्झितं गद्यम्'** इति विश्वनाथस्य अभिप्रायः । वृत्तस्य छन्दसः गन्धेन लवेनापि उज्झितं नाम रहितं गद्यम् इति अस्यार्थः स्पष्टीभवति । **'अपादः पदसन्तानः गद्यमित्यभिधीयते'**इत्यनेन गद्यलक्षणं निरुच्यते ।

**'छन्दोबद्धपदं पद्यम्'** इत्यनेन शास्त्रप्रसिद्धलक्षणयुतेन छन्दसा नियन्त्रितं पद्यम् इति अवगम्यते । **'गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते'** इत्युक्तिः गद्यपद्योभयात्मकं काव्यं चम्पूः इति निश्चिनोति । एवं श्रव्यकाव्ये अपि नाना प्रकाराः निरूप्यन्ते साहित्यमीमांसकैः ।

आनन्दनिस्यन्दीनि रूपकाणि साहित्यप्रपञ्चस्य अपूर्वरमणीयं योगदानम् । साहित्यमञ्जर्याम् अभिनवं सुगन्धयुक्तं कुसुमं तु रूपकमेव इति मन्यते । अस्मिन् सङ्गीतं, साहित्यम्, अभिनयः इत्यादयः ललितकलाः सामञ्जस्येन सम्मील्य आपण्डितपामरम् अनिर्वचनीयम् आनन्दम् उत्पादयन्ति । कल्पनाविलासैः भाववैभवैः सुमनोहरसन्निवेशैः च सहृदयानां हृदयाणि रङ्गस्थलम् इव परिवर्तयति नाटकम् । मानवानां रागद्वेषमदमात्सर्यादिगुणानां परिवर्तनं हृदयावर्जकरीत्या सम्प्रदर्श्य रससुधां समुत्पाद्य चित्तं संशोध्य

ISBN 978-1-56646-725-4

स्वार्थात् निस्स्वार्थं प्रति नीयमाना दिव्या कला एव रूपकम् ।

यद्यपि नाटकं रूपकप्रभेदे अन्यतमं सदपि अर्थभेदे स्वरूपभेदे च सत्यपि सर्वेषां रूपकाणां नाटकमिति सामान्यव्यवहारः आबहोःकालादेव लोके दरीदृश्यते। नाटकानां महत्ताविषये कविकुलगुरोः कालिदासस्य वागियं लोकविख्याता यथातथं च वर्तते । तद्यथा –

**"देवानामिदमामनन्ति मुनयः कान्तं क्रतुं चाक्षुषम्**
**रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा ।**
**त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते**
**नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम् ॥"2**

नाटकानां सौन्दर्यस्वारस्यास्वादनरताः **'काव्येषु नाटकं रम्यं' 'नाटकान्तं साहित्यं' 'नाट्यवेदः'** इत्यादिभिः वाग्भिः प्राशंसत । भासकालिदासभवभूतिप्रमुखाः नाटकानि विरचय्य आचन्द्रार्कयशोभाजः अभूवन् । यात्रासु उत्सवेषु पर्वसु च नाटकानि महत्त्वपूर्णं स्थानं भजन्ते स्म । वेदकालादारभ्य अद्यपर्यन्तमपि साहित्यस्य अयं प्रकारः वर्धमानः एव वरीवर्तते । परमशिवः एव आदिनटः । तस्येयं सृष्टिरेव एकम् अद्भुतं नाटकम् इत्युच्यते।

- **कालिदासः तदीयसाहित्यं च**

संस्कृतसाहित्यजगतः विभिन्नेषु काव्यप्रकारेषु नदीष्णः अयं कालिदासः नितराम् अतिशेतेतराम् इतरान् कवीन् । संस्कृतसाहित्यप्रपञ्चे **'कविकुलगुरुः'** इति ख्यातस्य अस्य कविताशक्तिः प्रतिभा च अनितरसाधारणी अनन्यसदृशी च । **'कालिदासो विलासः'**इति वाणी काव्येषु अस्य वैलास्यं दृढयति ।वरकविः अयं संस्कृतसाहित्यस्य शाश्वतकीर्तिं सम्पाद्य वैश्विकीं मान्यतां प्राकल्पयत् । अस्य **'अभिज्ञानशाकुन्तलं'**जगतः नैकासु भाषासु अनूदितं वर्तते ।कालिदासस्य विषये नैकाः जनश्रुतयः श्रूयन्ते । कालीदेव्याः अनुग्रहेण अयं कालिदासः इति नाम्ना प्रसिद्धः वरकविः अभूत् इत्येका कथा वर्तते । धारानगर्याः राज्ञः भोजस्य आस्थानकविः अयम् आसीत् इति अपरा कथा विद्यते । विक्रमादित्यस्य आस्थाने नवमणिषु अयमन्यतमः आसीत् इति च

ISBN 978-1-56646-725-4

अन्या कथा श्रूयते ।

कालिदासस्य जन्मजीवितदेशकालादयः निश्चप्रचं न निश्चिताः । अस्य काव्येषु उज्जयिन्याः प्रभावः वर्णनं च नितरां दृश्यते इति हेतोः अस्य जन्मस्थानम् उज्जयिनी स्यात् इति ऊह्यते । काश्मीरेषु एव दृश्यमानं केसरपुष्पं यथातथमसौ अवर्णयदिति कारणात् प्रायशः अस्य वासस्थानं काश्मीरः स्यादिति मन्यते ।अस्य कालः क्रिस्ताब्दस्य चतुर्थं पञ्चमं वा शतकम् इति बहवः विमर्शकाः अभिप्रयन्ति । सर्वविधकाव्यकर्मनिपुणः कालिदासः कुमारसम्भवं रघुवंशम् इति महाकाव्यद्वयम्, ऋतुसंहारः मेघदूतम् इति खण्डकाव्यद्वयं, मालविकाग्निमित्रं विक्रमोर्वशीयम् अभिज्ञानशाकुन्तलम् इति नाटकत्रयं च विरचय्य लोकोत्तरं यशः प्राप ।

- **कालिदासीयरूपकेषु पर्यावरणप्रीतिः**

कालिदासस्य प्रकृतिवर्णनासामर्थ्यं सहजं सुन्दरम् अनुपमम् अद्वितीयं च । तस्य नाटकेषु विशेषतया वर्णिताः वैशाखस्य शाखः, माघस्य शैत्यं, वर्षर्तोः झञ्झावातः, शरत्कालस्य निर्मलं गगनं, हेमन्तस्य हिमः, वसन्तस्य कुसुमसुगन्धः इत्येते सर्वे प्रणयभावभरितान् प्रणयिनः उद्दीपयन्ति । कूजन्तः पक्षिणः, उद्भवन्तः तरङ्गाः, मन्दं चलनशीलः वायुः, भीकराः मेघाः एते सर्वे प्रणयिनाम् उपकारं कुर्वन्ति ।

प्रदह्यमानः प्रभाकरः, प्रशान्तः निशाकरः, शुष्का नदी चेत्यादयः यथासन्दर्भं वर्णिताः । हर्म्यतलेषु सुप्तानां ललनानां मुखचन्द्रं दृष्ट्वा लज्जितः चन्द्रः श्वेतायते । जनाः जलयन्त्रमन्दिराणि हर्म्यतलानि च आश्रयन्ति । ललनाः दुकूलचन्दनहारनूपुरैः अलङ्कृताः इतस्ततः अटन्ति । वनितानां नूपुररणितं कामिजनान् आकर्षयति । सूर्यमयूखैः सन्ताडितः सर्पः तरोः छायाम् आश्रयति।

प्रकृतिसौन्दर्येण मुग्धः मयूरः सर्पमवति । सूर्यरश्मिभिः सन्तप्तः मण्डूकः सर्पस्य फणिच्छायां सेवते । तृषाकुलः अपि फणिः मण्डूकं न मारयति । मत्तकुञ्जररूपिणं मेघम् उद्धृत्य सौदामनीस्वरूपिणी पताका पयोदज्योतिनिस्स्वनैः भेरीनिनादैः सह रञ्जयन् वर्षकालः च समायाति ।

ISBN 978-1-56646-725-4

मेघानां जलधारा, समुद्भूतम् इन्द्रधनुः, गर्जन्ती विद्युत्, नृत्यन्ती मयूरी, वेपमानाः तरुलताः, प्रवहन्तः नदीनदाः हरिद्वर्णशोभितानि काननानि विरहिणां महान्तं सन्तापमुत्पादयन्ति ।

- **अभिज्ञानशाकुन्तले पर्यावरणप्रीतिः**

प्रकृतेः आराधकः कालिदासः अन्तरङ्गसौन्दर्यमिव बाह्यसौन्दर्यमपि मनोहरं चित्रयति। सः समग्रस्य भारतवर्षस्य पर्यटनं कृत्वा तत्रत्यं प्रकृतिसौन्दर्यं मनसा अन्वभवत् । तस्य नाटकेषु सुखदुःखमये मानवजीवने प्रकृतिः अन्यूनातिरिक्ततया समं पात्रं धरति । विक्रमोर्वशीयाभिज्ञानशाकुन्तलयोश्च चतुर्थाङ्के पुरूरवकण्वशकुन्तलाभिः साकं प्रकृतिः भावपूर्णतया व्यवहरति। यथा सः अन्तरङ्गसौन्दर्यम् अवर्णयत् तथैव बाह्यसौन्दर्यमपि भूरि स्तुतवान्। मनोहररूपेण कालिदासः निसर्गस्य चित्रणं प्रदत्तवान् ।

कालिदासः स्वाश्रयदात्रा सह आभारतम् अटितवान् । अतः सर्वत्र सः प्रकृतिसौन्दर्यम् आस्वादयत्। स्वकृतिषु स्वानुभूतनिसर्गरमणीयतां प्रगाढरीत्या सहृदयान् प्रति प्रादात् । तस्य काव्येषु प्रकृतिः सुखदुःखमये मानवजीवने भागिनी भूत्वा सहकरोति । मानवप्रकृतिसहसम्बन्धवर्णने कालिदाससमः नान्यः कविः भारते दृश्यते । विशेषेण अभिज्ञानशाकुन्तले तस्य निसर्गवर्णनकौशलं द्योत्यते। यतः अस्य नाटकस्य नायिका शकुन्तला प्रकृत्या एव पालिता। सा तु प्रकृतेः साकारमूर्तिरिव कालिदासेन अभिवर्णितास्ति। सा तु निसर्गेन सह बन्धुतामेव स्थापयित्वा व्यवहरति। प्राणिपक्षिसस्यादिभिः सह तस्याः सहजातभावः आसीत्। एतस्य अंशस्य अद्भुतं वर्णनम् उपलभ्यते अभिज्ञानशाकुन्तले । शकुन्तला इति नाम एव निसर्गदत्तम् उपायनमस्ति।

अस्य नाटकस्य आरम्भः एव निसर्गचित्रणेन भवति । आदौ मङ्गलश्लोके एव कालिदासः सृष्टिप्रक्रियां सम्यक् निजगाद। तदनु ग्रीष्मकाले कथायाः आरम्भः । अतः तस्य ऋतोः वर्णनेन नाटकस्य आरम्भः कविना अकारि। तत्पश्चात् कण्वाश्रमस्य सुष्ठु वर्णनं मनः आह्लादयति। मरीच्याश्रमस्य वर्णनमपि चेतः प्रसादयति । आहत्य सप्तसु अपि अङ्केषु भूरिशः प्रकृतेः

ISBN 978-1-56646-725-4

वर्णनं दरीदृश्यते ।

प्रकृतेः वर्णनं कालिदासेन पदरूपेण वाक्यरूपेण श्लोकरूपेण चाकारि । पर्यावरणवर्णनं नाम वृक्षस्य प्राणिनः पक्षिणः नद्याः ऋतोः कालस्य मासस्य चेत्यादीनां बहूनाम् अंशानां वर्णनं भवति । अन्त्ये भरतवाक्येऽपि कालिदासः **'प्रवर्ततां प्रकृतिहिताय पार्थिवः'** इति प्रार्थनाम् अकरोत् ।यद्यपि अस्य पौरश्रेणीहिताय इत्यर्थः परन्तु प्रकृत्या विना मानवस्य जीवनं दुश्शकं भवति । अतः पार्थिवाः प्रकृतिहितसंरक्षणद्वारा जनहितरक्षणं कुर्युः इति तात्पर्यम् । आदौ यथा सृष्टिवर्णनं मङ्गलश्लोकरूपेण तेनाकारि–

**"या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री**
**ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् ।**
**यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः**
**प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥"3**

नाटकेऽस्मिन् कालिदासः पात्राणां तरुलतादिभिस्सह सम्बन्धम् उपाकल्पयत् । अचेतनानां नैसर्गिकवस्तुविशेषाणां चेतनारूपेण व्यवहारमपि कल्पितवान् । निसर्गस्य सुन्दरवर्णनमपि अकार्षीत् । एभिरंशैः तस्य पर्यावरणप्रीतिः दरीदृश्यते । अस्य तपोवनविषये आसक्तिः भक्तिश्च अधिकतया दृश्यते नाटके अमुष्मिन् । अतः प्रथमे सप्तमे च अङ्के सः तपोवनं भृशम् अवर्णयत् । यथा–

**"नीवाराः शुकगर्भकोटरमुखभ्रष्टाः तरूणामधः**
**प्रस्निग्धाः क्वचिदिङ्गुलीफलभिदः सूच्यन्त एवोपलाः ।**
**विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगाः**
**तोयाधारपथाश्च वल्कलशिखानिष्यन्दरेखाङ्किताः ॥"4**

- **मालविकाग्निमित्रे पर्यावरणप्रीतिः**

मालविकाग्निमित्रे नायिका कुन्दलता इव शोभते इति प्रकृत्युपमया वर्णयति । तद्यथा –

**"वामं सन्धिस्तिमितवलयं न्यस्तहस्तं नितम्बे**
**कृत्वा शामीविटपसदृशं स्रस्तमुक्तं द्वितीयम् ।**

ISBN 978-1-56646-725-4

पादाङ्गुष्ठा लुलितकुसुमे कुट्टिमे पातिताक्षं

नृत्तादस्याः स्थितमतितरां कान्तमृज्ज्वायतार्धम् ॥"5

अलङ्कृतम् अन्तःपुरं, सुसज्जा सङ्गीतशाला, गाननर्तनानि, प्रमदोद्यानम्, ऋतुराजः वसन्तः, कमलपुष्पच्छायासु उपविष्टाः हंसाः, वलभिपरिचयं द्विषन्तः कपोताः, विवर्तमानं जलयन्त्रं, जलबिन्दूनां पिपासया भ्रमन्तः मयूराः, लतामन्दिरं, दोलागृहम्, अशोकवनं विकासयन्ती वसन्तलक्ष्मीः इव शोभमाना मालविका इत्यादिसन्दर्भेषु पर्यावरणम् अनेन अनुपमं वर्णिता । श्लोकोऽयं प्रकृतिं सुन्दरं चित्रयति । यथा –

"मधुरस्वरा परभृता भ्रमरी च विबुद्धचूतसङ्गिन्यौ ।

कोटरमकालवृष्ट्या प्रबलपुरोवातया गमिते ॥"6

"पात्रविशेषन्यस्तं गुणान्तरं व्रजति शिल्पमाधातुः ।

जलमिव समुद्रशुक्तौ मुक्ताफलतां पयोदस्य ॥"7

- **विक्रमोर्वशीये पर्यावरणप्रीतिः**

विक्रमोर्वशीये मूर्छोत्थितायाः उर्वश्याः सुन्दरं दृश्यं प्रकृतिगतांशैः वर्णयति । यथा –

"आविर्भूते शशिनि तमसा मुच्यमानेव रात्रिः

नैशस्यार्चिर्हुतभुज इव छिन्नभूयिष्ठधूमा ।

मोहेनान्तर्वरतनुरियं लक्ष्यते मुच्यमाना

गङ्गारोधःपतनकलुषा गृह्णतीव प्रसादम् ॥"8

नायिका उर्वशी लता इव शोभमाना इति एवं प्रकृत्यंशैः इत्थं वर्ण्यते –

"तन्वी मेघजलार्द्रपल्लवतया धौताधरेवाश्रुभिः

शून्येवाभरणैः स्वकालविरहाद्विश्रान्तपुष्पोद्गमा ।

चिन्तामौनमिवास्थिता मधुलिहां शब्दैर्विना लक्ष्यते

चण्डी मामवधूय पादपतितं जातानुतापेव सा ॥"9

विक्रमोर्वशीये मध्याह्नस्य वर्णनम् इत्थं कृतं कालिदासेनत्


"उष्णालुः शिशिरे निषीदति तरोर्मूलालवाले शिखी
निर्भिद्योपरि कर्णिकारमुकुलान्यालीयते षट्पदः ।
तप्तं वारि विहाय तीरनलिनीं कारण्डवः सेवते
क्रीडावेश्मनि चैष पञ्जरशुकः क्लान्तो जलं याचते ॥"10

- **निष्कर्षः**

कालिदासप्रणीतेषु त्रिष्वपि नाटकेषु पर्यावरणस्य प्रकृतेः वा प्रधानभूमिका दृश्यते । एतेषां नाटकानां प्रत्येकमपि अङ्केषु ऋतूनां प्रकृतेः पर्यावरणस्य च चिन्तनं वर्णनं वा यथोचितं विहितं वर्तते कविना । प्रकृतिवर्णनरहितानि कालिदासस्य नाटकानि क्वचिदपि न दृश्यन्ते । अतः एव तस्य प्रकृतिकविः इति अन्वर्थाभिधानम् । मालविकाग्निमित्रे तारुण्यसहजशृङ्गारस्य वर्णने प्रमदवनादीनां वर्णनं कृतम् । विक्रमोर्वशीये च नायिकायाः उर्वश्याः वर्णने प्रकृतेः एव उपमा प्रदत्ता कालिदासेन । अभिज्ञानशाकुन्तले कण्वाश्रमवर्णनावसरे मारीचाश्रमस्य प्रसन्नताप्रतिपादने च प्रकृतेः अनुपमं वर्णनं व्यधायि कविना । इत्थं सर्वेष्वपि स्वीयरूपकेषु कविः कालिदासः पर्यावरणस्य ऋतूनां प्रकृतेः च यथोचितं वर्णनं कृत्वैवप्रसिद्धिं लेभे ।

- **पादटिप्पण्यः**

१. मम्मटः – काव्यप्रकाशः ।
२. कालिदासः – मालविकाग्निमित्रम्–०१–०४ ।
३. कालिदासः – अभिज्ञानशाकुन्तलम्–०१–०१ ।
४. कालिदासः–अभिज्ञानशाकुन्तलम्–०१–१३ ।
५. कालिदासः – मालविकाग्निमित्रम्–०२–०६ ।
६. कालिदासः – मालविकाग्निमित्रम्–०४–०२ ।
७. कालिदासः – मालविकाग्निमित्रम्–०१–०६ ।
८. कालिदासः – विक्रमोर्वशीयम्–०१–०७ ।
९. कालिदासः – विक्रमोर्वशीयम्–०४–६७ ।
१०. कालिदासः – विक्रमोर्वशीयम्–०२–२२ ।



Department of studies in sanskrit

Manas Gangothri, University of Mysore
Mysuru - 06

ISBN 978-1-56646-725-4
9781566467254